॥६०॥ अर्हं नमः ॥ श्रीगुरुभ्यो नमः ॥ श्रीशंखेश्वरपार्श्वनाथाय नमः ॥ ऐं नमः ॥ श्रीसरस्वत्यै नमः
॥ ऐं नमः ॥ प्रणम्य परमश्रेयस्करं श्रीजगदीश्वरं । कल्पसुबोधिकां कुर्वे वृत्तिं बालोपकारि-
णीं ॥१॥ यद्यपि बह्व्यष्टीकाः कल्पे सन्त्येव निपुणगणगम्याः । तदपि ममायं यत्नः फलेग्रहिः स्व-
ल्पमतिबोधात् ॥२॥ यद्यपि भानुद्युतयः सर्वभावावभासिका बह्व्यः । तदपि मन्दिरगृहगानां
प्रदीपिका व्युपकुरुते नागू ॥३॥ नास्माकं ई विशेषानस्तु क्तायानापि पद्यपाण्डित्यात् के-

वलमर्थव्याख्या वितन्यते बालबोधाय ॥४॥ हास्यो न स्यां सद्भिः कुर्वन्तु तामती बालाबु-
द्धिरपि यद्वदिशति तथा वदति आलापवाक् क्रियते नीयं ॥५॥ अत्र हि पूर्वं नवकल्पविहार-
क्रमेणागतायां गणांतरवर्षासु प्रतनवपरंपरया गुर्वादिष्टानुसारेण चतुर्मासीस्थिताः साधवः आयानि-
मित्तं आनन्दपुरे सभासमक्षं वाचनादारभ्य संघसमक्षं पंचभिर्दिनैः वाचनाः श्रीकल्पसूत्रं १

× अन्ये त्वेवं सर्वदा सचेलकत्वं यच्च किरणावलीकारेण सर्वेषां जिनानां शक्रोपनीतदेवदूष्यापगमे अचेलकत्वमुक्तं । तच्चिन्त्यं । उसभेण अरहा
कोसलिए संवच्छरं साहियं चीवरधारी होत्था तेण परं अचेलए इति जंबूद्वीपप्रज्ञप्तिवचनात् । सव्वो अचेलकधम्मो पुरिमस्स य पच्छिमस्स जिणस्स ॥ वीरस्स वरिसमहि-
वाचयन्ति तत्र कल्पशब्देन साधूनां आचारः कथ्यते तस्य च कल्पस्य दशधा तद्यथा आचे-
लक्कुद्देसिय १ सिज्जायर रायपिंड किइकम्मे वय जिट्ठ पडिक्कमणे मासं पज्जो-
सवणाकप्पे ॥१॥ व्याख्या आचेलक्यमिति न विद्यते चेलं वस्त्रं यस्य स अचेलकस्तस्य भावः
आचेलक्यं विगतवस्त्रत्वमित्यर्थः तच्च तीर्थकरानाश्रित्य प्रथमान्तिमजिनयोः श-
क्रोपनीतदेवदूष्यापगमे सर्वदा अचेलकत्वं साधूनाश्रित्य च अ-
जितादिद्वाविंशतिजिनतीर्थसाधूनां ऋजुप्राज्ञानां बहु-

मूल्यविविधवर्णवस्त्रपरिभोगानुज्ञासद्भावेन सचेलकत्वमेव केषां-
चित् श्वेतमानोपेतवस्त्रधारित्वेन अचेलकत्वमपीति अनियतः तेषामयं कल्पः श्री-
ऋषभवीरतीर्थयतीनां च सर्वेषामपि श्वेतमानोपेतजीर्णप्रायवस्त्रधारित्वेन अचेलकत्वमेव न-
नु वस्त्रपरिभोगे सत्यपि कथं अचेलकत्वं इति उच्यते जीर्णप्रायतुच्छवस्त्रे सत्यपि अवस्त्रत्वं सर्वजन-
प्रसिद्धमेव तथाहि कृतपोतिका नदीमुत्तरन्ती वदति अस्माभिर्नग्नैः सूत्रनद्युत्तीर्णा इति तथा सत्य

यं । अयं विशे-
षाणं तस्य वि-
इत्ति सम तिश्रा
तस्यानकयच
नाश्वेति ज्ञेयं ॥
३-५

पि वस्त्रं तंतुवायरजकादीश्च वदंति शीघ्रं अस्माकं वस्त्रं देहि वयं नग्नाः स्मः इति एवं साधूनां वस्त्रसा-
न्नावपि अचेलकत्वं इति प्रथमः तथा आदेसिअत्ति आधाकर्मिकं इत्यर्थः साधुनिमित्तं कृ-
तं अशनपानखादिमस्वादिमवस्त्रपात्रवसतिप्रमुखं तच्च प्रथमचरमजिनतीर्थे एकं साधुं एकं सा-
धुसमुदायं एकं उपाश्रयं वा आश्रित्य कृतं तत् सर्वेषां साध्वादीनां न कल्पते द्वाविंशतिजिना-
तीर्थे तु यं साधु दि कं आश्रित्य कृतं तत् त तस्यैव अकल्प्य अ न्येषां तु कल्पते

इति द्वितीय ॥ तथा सिज्जा य र त्ति शय्या त रो वसतिस्वामी त-
स्य पिंडः अश न १ पान २ खादिम ३ स्वा दिम ४ वस्त्र ५ पा त्र ६ कंबल ७ रजोह-
रण ८ सूची ९ पि प्पलक १० नखरदन ११ कर्णशोधनक १२ ल क्षणो द्वादशप्रकार
ः सर्वेषां जिनानां तीर्थेषु सर्वसाधूनां न कल्पते अनेषणीय प्रसंग वसतिदौर्लभ्यादि बहुदोष-
संभवात् अथ यदि साधवः समग्रां रात्रिं जाग्रति प्रातः प्रतिक्रमणं च अन्यत्र कुर्वंति तदा मूलाला-
पाश्रयस्वामी शय्यातरो न भवति यदि च तत्र निद्रायंति प्रतिक्रमणं च अन्यत्र कुर्वंति तदापि २

शय्यातरो भवति तथा हरण डगल भस्म मल्लक पीठ फलक शय्या संस्तारक लेपादि वस्तूनि
चारित्रयुक्तः सोपधिकः शिष्यश्च शय्यातरस्यापि ग्राह्यो कल्पते इति तृतीयः रायपिंडत्ति सेना प-
पुरोहित श्रेष्ठि अमात्य सार्थवाह लक्षणैः पंचभिः सह राज्यं पालयन् मूर्द्धाभिषिक्तो यो राजा त-
स्य अशनादि चतुष्कं वस्त्र पात्र कंबल रजोहरण इति अष्टविधः पिंडः प्रथमचरमजि-
नसाधूनां निर्गच्छतां आगच्छतां मंत्रादिभिः स्वाध्या य व्याघातस्य अपशकुनबुद्ध्या शरीरव्याघातस्य सं-
भवात् स्वाद्यलाम्पट्य लघुत्व निंदादिदोषसं भ वाच्च निषिद्धः द्वाविंशतिजिनसाधूनां तु क-

ल्प प्राज्ञत्वेन पूर्वोक्तदोषाभावेन राजपिंडः क ल्पते इति चतुर्थः किइकम्मत्ति कृतिक-
र्म वंदनकं तत् द्विधा अभ्युत्थानं द्वादशावर्त्तं च त त् सर्वैः अपि तीर्थेषु साधुभिः परस्परं यथा दी-
क्षापर्यायेण विधेयं साध्वीभिश्च चिरदीक्षिताभिरपि नवदीक्षितोपि साधुर्वंद्यः पुरुषप्रधान-
त्वात् धर्मस्य इति पंचमः वयत्ति व्रतानि महाव्रतानि तानि च द्वाविंशतिजिनसाधूनां चत्वारि यत-
स्ते एवं जानंति यत् अपरिगृहीता याः स्त्रियाः भोगाः संभवात् स्त्री अपि परिग्रह एवेति परिग्रहप्रत्याख्या-
ने स्त्रीप्रत्याख्यानं प्रथमचरमजिनसाधूनां तु तथा ज्ञानाभावात् पंच व्रतानि इति षष्ठः जिहत्ति ज्येष्ठ

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

रत्नाधिकः स एव कल्पो ऽत्र इह लघुर्व्यवहार इत्यर्थः। तत्र आद्यांतिमजिनयतीनां उपस्थापनातः
प्रारभ्य दीक्षापर्यायगणना मध्यमजिनयतीनां च निरतीचारचारित्रत्वात् दीक्षादिनादेव अथ पिता
पुत्र माता दुहिता राजामात्यश्रेष्ठिवणिक्पुत्रादीनां सार्द्धं गृहीतदीक्षाणां उपस्थापनायां को विधिः उच्य
ते यदि पित्रादयः पुत्रादयश्च समकालमेव षड्जीवनिकायाध्ययनायागाढोद्वहनादिना योग्यतां
प्राप्तास्तदा अनुक्रमेणैवोपस्थापना अथ स्तोकं अंतरं तदा कियद्विलंबनापि पित्रादीनामेव
प्रथमं उपस्थापना अन्यथा पुत्रादीनां हठेवन पित्रादीनां अप्रीतिः स्यात् तथा पुत्रादी
नां सप्रज्ञापनं अनिच्छतां निःप्रज्ञापनं महदंतरं तदा स पित्रादिरेवं प्रतिबोध्यः। भो महा
भाग स प्रज्ञापितव पुत्रः आन्यात्या बक्कुस्पोल दुर्विष्णति तव पुत्रत्र चज्याष्टतवैव गौरवं ए
वं प्रज्ञापितः स यदि अनुमन्यते तदा पुत्रादिः प्रथमं उपस्थापनीयः नान्यथा इति सप्तमः। पडि
क्कमणत्ति अतीचारा भवंतु मा वा परं श्रीऋषभवीरसाधूनां उभयकालं अवश्यं प्रतिक्रमणं
कर्त्तव्यमेव शेषजिनमुनीनां च दोषे सति प्रतिक्रमणं नान्यथा तत्रापि मध्यमजिनयतीनां कारणे
सद्भावे दैवसिकरात्रिकमेव प्रायः प्रतिक्रमणं न तु पाक्षिकचातुर्मासिकसांवत्सरिकाणि तथा चो ३

क्तं सप्ततिशतस्थानकग्रंथे देसिय १ राइय २ पक्खिय ३ चउमासिय ४ वच्छरीय ५ नामाउ पंच पडिकमणा
मज्झिमगाणं आदापढमा १ तह उत्तमयडक्कालं इयराणं कारणाइ उ मुणिणा इति अष्टमः। मासत्ति
आद्यांत्यजिनयतीनां मासकल्पमर्यादा नियता दुर्भिक्षाशक्तिरोगादिकारणसद्भावेपि आखा
पुरपाटककोणादिकपरावर्त्तनापि सत्यापनीयेव पंचमाषकालमासादधिकं नस्थेयं प्रतिबंधलघु
त्वप्रभृत्वबकुशदोषसंभवात् मध्यमजिनयतीनां तु ऋजुप्राज्ञानां दोषावक्तिदोषाभावेना

अनियतो मासकल्पः। तद्विष्टैवीकादिं यावदपि एकत्र तिष्ठंति कारणे मासमध्येपि वि
हरंति इति नवमः। पज्जोसवणाकप्पत्ति परिसामस्त्येन उषणं वसनं पर्युषणा तत्र पर्युषणाश
ब्देन सामस्त्येन वसनं वार्षिकं पर्व च द्वयं अपि कथ्यते तत्र वार्षिकं पर्व भाद्रपदसितपंचम्यां कालक
सूरेरनंतरं चतुर्थ्यामभवति सामस्त्येन वसनलक्षणा पर्युषणा कल्पो द्विविधः सालंबनो निरालं
बनश्च तत्र निरालंबनः कारणाभावे वानित्यर्थः सच द्विविधो जघन्य उत्कृष्टश्च तत्र जघन्यः सांव
त्सरिकप्रतिक्रमणादारभ्य कार्त्तिकचतुर्मासप्रतिक्रमणं यावत् सप्ततिदिनमानः। उत्कृष्टस्तु चा

तुर्मासिकः अयं द्विविधो निरालंबनः स्थविरकल्पिनां जिनकल्पिकानां च एको निरालंबनश्चातुर्मा
सिक एव सालंबनस्तु कारणिक इत्यर्थः यत्राद्यान्त्यमासकल्पः कृतस्तत्रैव चतुर्मासककरणाच्चतु
र्मासिकानंतरं च मासकल्पकरणात् षाण्मासिकोऽयमपि स्थविरकल्पिकानामेव तथा पंचकं पंचकं वृ
द्ध्या वृद्धिर्ज्ञाताऽज्ञातादिविस्तरः सूत्रेनात्र लिखितः सांप्रतं संघाज्ञया तस्य विधेर्व्युच्छिन्नत्वाद्विस्तरस्तयात्र
विशेषार्थिना च कल्पकिरणावल्यादाया विलोक्या एवं सर्वत्रापि ज्ञेयं आवं वर्णितस्वरूपः पर्युष
णाकल्पः प्रथमांतिमजिनतीर्थे नियतः शेषाणां तु अनियतः यतस्ते हि दोषाभावे कस्मिन्न

क्षेत्रादावानां पूर्वकोटिं यावत्तिष्ठंति दोषसद्भावे न मासं अपि एवं महाविदेहेष्वपि द्वाविंशति
जिनवआर्वषांजितां कल्पव्यवस्था ज्ञेया इति दशमः एतद् दशापि कल्पाः ऋषभवर्द्धमानतीर्थे नि
यता एव द्वाविंशतिजिनतीर्थे तु आचेलक्यौद्देशिकप्रतिक्रमणराजपिंडमासपर्युषणालक्ष
णाः षट् कल्पा अनियताः शेषास्तु शय्यातरचतुर्व्रतपुरुषज्येष्ठकृतिकर्मलक्षणाश्चत्वारो नियता
ताः एवमिति दशानां कल्पानां नियतानियतविभागः ननु एकस्मिन्मोक्षमार्गसाध्ये कथं प्रथमचरमजिन

साधूनां द्वाविंशतिजिनसाधूनां च आचारभेदः उच्यते जीवविशेषा एव तत्र कारणं तथाहि श्रीऋषभ
तीर्थे जीवा ऋजुजडास्तेषां धर्मस्य अवबोधो दुर्लभो जडत्वात् वीरतीर्थे साधूनां च धर्मस्य पालनं दुःक
रं वक्रजडत्वात् अजितादितीर्थे जिनसाधूनां तु धर्मस्य अवबोधः पालनं च द्वयं अपि सुकरं ऋजुप्राज्ञ
त्वात् ततः आचारभेदः कृतः अत्र च दृष्टांताः प्रदर्श्यंते यथा केचित्प्रथमजिनयतयो बहिर्भूमेर्गुरु
समीपं आगताः दृष्टाश्च गुरुभिर्लंबितया समवतां इयती वेला कृता ते सरलं ऊचुः स्वामिन्वयं नटं नृत्यं
तं विलोकयितुं स्थितास्तदा गुरुभिः कथितं इदं नटविलोकनं साधूनां न कल्पते तैरपि तथेति

अंगीकृतं अथ अन्यदा त एव साधवश्चिरेण उपाश्रयं आगतास्तथैव गुरुभिः पृष्टाः प्रोचुः
प्रलोकयंतं नटीं नृत्यंतीं निरीक्षितुं स्थितास्तदा गुरुभिरूचे भो महाभागाः तदा नो निवारिता नटनिषे
धेन नटनिषेधो नटीनिषेधोऽपि ज्ञेयः ततस्तैर्विज्ञप्तं स्वामिन्निदं अस्माभिर्न ज्ञातं अथेवं न करि
ष्यामः अत्र च जडत्वात् नटनिषेधे नटीनिषेधो वेत्ति तैर्न ज्ञातं ऋजुत्वाच्च सरलं उत्तरं दत्तं इति प्रथ
मः अत्र द्वितीयोऽपि दृष्टांतः यथा कोऽपि कुंकुणदेशीयो वणिग्वृद्धत्वे प्रव्रजितः सचिकदाप्यैर्यापथिकी

कायोत्सर्गेण चिरं स्थितो गुरुभिः पृष्टः एतावद्दीर्घकायोत्सर्गे किं चिंतितं स प्रोवाच स्वामिन् जीवदया चिं-
तिता कथमिति पुनर्गुरुभिः पृष्टश्चाह पूर्वं गृहस्थावस्थायामासं तत्र क्षेत्रनिष्पादनेन सर्वकणधान्यानि धा-
न्यानि बहून्यभूवन् इदानीमहं प्रव्रज्यां स्थितः यदि क्षेत्रनिष्पादनं न करिष्यंति तदा धान्याभावेन
वराकाः कथं भविष्यंतीति श्रुत्वा स्वामिभिः । यथास्थितं निवेदितं गुरुभिः कथितं महाना-
गडुर्भवति भवतां ऋजुजडानां तद्यतीनां ऋजुत्वात् स मिथ्यादुःकृतं ददौ ॥ ७ ॥ तथा वीरजिनयतीनां

×इति द्वितीयः×

वक्रजडत्वेपि दृष्टांतद्वयं तत्र कश्चिद्वीरतीर्थसाधुर्वा मनटं नृत्यंतं अवलोक्य गुरुसमीपं आ-
गतो गुरुभिः पृष्टो निषिद्धाः स्म नटावलोकनं प्रति ॥ पुनरन्यदा नटीं नृत्यंतीं विलोक्य आगतो गुरुभि-
स्तथैव पृष्टो वक्रतया अन्यानि उत्तराणि दत्वा पश्चात्सत्यं प्राह । गुरुभिरुपालंभे दत्ते संमुखं वयु-
क्ता न वदुपालब्धवंतः । यदस्माकं तदा नटनिषेधसमये नटीनिषेधोपि कृतो नाभूत् ततो भवतामेवायं
दोषः अस्माभिः किं ज्ञायते ॥ इति प्रथमदृष्टांतः । तथा कश्चिद्व्यवहारिसुतः पित्रा बहुशः शिक्ष्य-
माणो जनकादीनां संमुखं जल्पनं न कर्तव्यं इति पित्रोक्तवचनं वक्रतया मनसि दधार । अथैकदा सर्वेषु ५

श्री स्वजनेषु बहिर्गतेषु पुनः पुनः शिक्षयंतं पितरं अद्य शिक्षयामीति विचिंत्य कपाटं दत्वा स्थितः । आ-
गतेषु च पित्रादिषु द्वारोद्घाटनार्थं बहुशः शब्दकरणेपि न वक्ति न चोद्घाटयति ततो भित्तिमुल्लंघ्य गृहमध्ये प्र-
विष्टेन च पित्रा हसन् दृष्ट उपालब्धः कथयामास भवद्भिः शिक्षितं वा वृद्धानां उत्तरं न देयं इति द्वितीयः ॥ ८ ॥
अथाजितादियतीनां ऋजुप्राज्ञत्वे दृष्टांतः । यथा कश्चिदजितजिनयतिर्नटं निरीक्ष्य चिरेणागतो
गुरुभिः पृष्टो यथास्थितं अकथयत् गुरुभिः ॥ श्रु निषिद्धः । अथ अन्यदा बहिर्गतो नटीं नृ-

त्यंतीं विलोक्य प्राज्ञत्वात् विचारयामास ॥ यदस्माकं रागादिहेतुत्वात् गुरुभिर्नटनिरीक्षणं
निषिद्धं तर्हि नटी तु अत्यंतरागकारणत्वात् सर्वथा निषिद्धैव इति विचार्य नटीं नालोकितवान् ॥ ९ ॥ नन्-
तर्हि द्वाविंशतिजिनयतीनां ऋजुप्राज्ञानां सचेलधर्मः परं प्रथमजिनयतीनां ऋजुजडानां अचेलधर्मः
अनवबोधात् तथा च वक्रजडानां वीरयतीनां च सर्वथा धर्मस्य अचेलत्वमेव । एवं ऋजुजडानां प्रथमजि-
नयतीनां जडत्वेन स्खलनासद्भावेपि नाल्पविशुद्धत्वात् भवति धर्मः तथा वक्रजडानामपि वीरजिनयती-
नां ऋजुप्राज्ञापेक्षया अविशुद्धत्वात् भवति परं सर्वथा धर्मो न भवतीति न वक्तव्यं तथा वचने हि महान् दोषः

तदुक्तं । जाणइ नहि धम्मा न य सामइयं नावि वयव याइं । सोसमणसंघबज्झो कायव्वो समणसं
घेण ॥१४॥ तथा याचा नियतमवस्थानलक्षणः सप्ततिदिनमानः पर्युषणाकल्प उक्तः । सापि कारणाभावे विध
व कारणात्तु तन्मध्येपि विहर्त्तुं कल्पते तद्यथा अशिवेऽवमौदर्ये वा प्राप्ते २ राजद्विष्टे गध परगलावृ व
ऊर्मासकमध्येपि विहर्त्तुं कल्पते । न्यतः । १ असति स्थंडिलपडीवाकालईच्चवसतो ५ तथा कुंथुप्रभृत्या ७
तथा सार्प्ये ७ विहर्त्तुं कल्पते न्यतः २ तथा एवि॥ कारणेषु ऊर्मासि कात्यरातापि स्थातुं कल्पते व
र्षादविरतामार्गशीर्षमासे गमि अतिक्रमे पि कार्त्तिकास्विंशति स्तुनीसत्तमाः ३ एवं अशिवा

दिदोषाभावेपि संयमनिर्वाहार्थं क्षेत्रगुणा अवे ष णीयास्तत्र चत्वारि त्रिविधं जघन्यं १ उत्कृष्टं २ मध्य
मं ३ च । तत्र चतुर्गुणयुक्तं जघन्यं तच्चामी यत्र विहार भूमिः सुलभा आसन्नो जिनप्रासाद इत्यर्थः १ यत्र
स्थंडिलं शुद्धं निर्जीवं अनालोकं च २ यत्र स्वाध्यायभूमिः सुलभा स्वाध्यायादिरहिता ३ यत्र भिक्षा च
सुलभा अत्र योदशगुणं च उत्कृष्टं तच्चामी । यत्र भूयान्कर्दमो न भवति १ यत्र बहवः संमूर्छिमाः प्राणिनो न भ
वंति २ यत्र स्थंडिलं निर्दोषं भवति ३ यत्र वसतिः स्त्रीसंसर्गादिरहिता ४ यत्र गोरसं प्रचुरं ५ यत्र जनसम ६

वायो महान् भद्रकश्च ६ यत्र वैद्याश्च भद्रकाः ७ यत्र औषधानि सुलभानि ८ यत्र गृहस्थगृहाः समृद्धा बाध
न धान्यादि पूर्णाः ९ यत्र राजा भद्रकः १० यत्र ब्राह्मणादिभ्यः मुनीनामपमानं न स्यात् ११ यत्र भिक्षा सुलभा १२
यत्र स्वाध्यायः शुध्यति १३ । एवं चतुर्गुणादधिकं पंचादिगुणं त्रयोदशगुणान्न्यूनं षट्दशगुणपर्यंतं मध्य
मं क्षेत्रं । एवं उत्कृष्टक्षेत्राप्राप्तौ मध्यमं तस्याप्यप्राप्तौ जघन्यक्षेत्रं संप्राप्य तथा विदोषक्षेत्रमा
श्रित्य पर्युषणाकल्पः कर्त्तव्यः । अयं च दृष्टांतः । राज्ञापि कालेन दोषाभावेपि क्रियमाणस्तृतीयौषधव
त् हितकारको भवति । तथा हि केनचिन्नृपतिना स्व पुत्रस्य अनागतचिकित्सार्थं त्रयो वैद्या आका
रितास्तत्र प्रथमो वैद्य आह मदीयं औषधं विद्य मा नं व्याधिं हंति । रोगाभावे च नवगुणं नादोषं च करो
ति । राज्ञा प्राह अलं भस्मनि हुतवत् अल्पज्ञानेन औषधेन । किं द्वितीयः प्राह मदीयं औषधं रोगसद्भावे रोगं हं
ति रोगाभावे च दोषं प्रकटयति । राज्ञोक्तं सुप्तसर्पोत्थापनतुल्येन अज्ञानेनापि पर्याप्तं । तृतीयः प्राह मदीयं
औषधं सद्भावे रोगं हंति । तदभावे च शरीरस्य सौंदर्यवीर्यतुष्टिपुष्टिं करोति । राज्ञोक्तं इदं औषधं समीचीनं
तद्वदयमपि कल्पो दोषसद्भावे दोषं निराकरोति दोषाभावे च धर्मं पुष्णाति तदेवं सद्भुपस्थितपर्युष
वाहिमवणेइत्थावे । कोणइअ जावेतयंजवे पढमं ।१ बीयमवणे इनकुणइ २ तइअं तु रसायणं होइ ॥१॥ त्रि

णा पर्वणि मंगलनिमित्तं पंचसिरवदिनैः कल्पसूत्रं वाचनीयं तच्च यथा देवेषु इंद्रः । तारासु चंद्रः न्यायप्रवी
णेषु रामः । सुरूपेषु कामः । रूपवतीषु रंभा । वादित्रेषु भंभा । गजेषु ऐरावणः । साहसिकेषु रावणः । बुद्धिमत्सु
अभयः तीर्थेषु शत्रुंजयः गुणेषु विनयः धनुर्धरेषु धनंजयः । मंत्रेषु नमस्कारः वृक्षेषु सहकारः तथा सर्वशा
स्त्रेषु शिरोमणिरिवायं विस्तरेन्नि यतः नार्हतः परमो देवो न मुक्तेः परमं पदं न श्रीशत्रुंजयात्तीर्थं श्रीकल्पा
न्न परं श्रुतं ॥१॥ तथायं कल्पः साक्षात्कल्पद्रुम एव तस्य वच्छनात्पुष्प्योउक्तत्वात् श्रीवीरचरित्रं बीजं श्रीपा
र्श्वचरित्रं अंकुरः । श्रीनेमिचरित्रं स्कंधः श्रीऋषभचरित्रं शाखासमूहः । स्थविरावली पुष्पाणि ।
सामाचारीज्ञानं सौरभ्यं फलं मोक्षप्राप्तिः । किंचावाचनाश्रादाय्यदाना अर्वाक्षेरश्चातरपि विधिना रा
धितः कल्पः शिवदोंतर्भवाष्टकं ॥२॥ एगग्गचित्ता जिणसासणंमि पभावणापूअपरायणा जे तिसत्तवारं नि
सुणंति कप्पं भवण्णवं गोयम ते तरंति ॥२॥ एवं च कल्पमहिमानमाकर्ण्य तपःपूजाप्रभावनादिधर्मका
र्येषु कष्टधनव्ययसाध्येषु आलस्यं न विधेयं सकलसामग्रीसहितस्यैव तस्य वांछितफलप्रापकत्वात् यथा
बीजं अपि दृष्टिवायुप्रभृतिसामग्रीसद्भावे एव फलनिष्पत्तिसमर्थं नान्यथा एवं अयं श्रीकल्पोपि देवगुरुपूजाप्र
भावनासाधर्मिकवात्सल्यप्रमुखसामग्रीसद्भावे एव यथोक्तफलदः । अन्यथाऽक्काविनस्त्रकारा जिणवरव

महस्सवद्धमाणस्स संसारसागराउ तारेइ नरं व नारिं वा इति श्रुत्वा किंचित्क्रियासाध्ये कल्पश्रवणेपि
आलस्यं न विधेयं । अथ गुरुपर्वविश्वासवचनविश्वासमिति श्रीकल्पसूत्रस्य प्रणेतारं कथ्यते । स च चतुर्दश
पूर्वविद् युगप्रधानश्रीभद्रबाहुस्वामी दशाश्रुतस्कंधस्य अष्टमाध्ययनतया प्रत्याख्यानप्रवादाभिधानन
वमपूर्वात् उद्धृत्य कल्पसूत्रं रचितवान् तत्र पूर्वाणि च प्रथमं एकेन हस्तिप्रमाणमषीपुंजेन लेख्यं द्वि
तीयं द्वाभ्यां २ तृतीयं चतुर्भिः ४ चतुर्थं अष्टाभिः ८ पंचमं षोडशभिः १६ षष्ठं द्वात्रिंशता सप्तमं चतुः
षष्ट्या ६४ अष्टमं अष्टाविंशत्यधिकशतेन १२८ नवमं षट्पंचाशदधिकशतद्वयेन २५६ दश
मं द्वादशाधिकैः पंचभिः शतैः ५१२ एकादशं चतुर्विंशत्यधिकेन सहस्रेण १०२४ द्वादशं अ
ष्टचत्वारिंशदधिकया द्विसहस्र्या २०४८ त्रयोदशं षण्णवत्यधिकया चतुःसहस्र्या ४०९६ चतुर्द
शं च अष्टसहस्र्या द्विनवत्युत्तरशताधिकया ८१९२ सर्वाणि पूर्वाणि षोडशभिः सहस्रैस्त्र्यशीत्यधि
किस्त्रिभिः शतैश्च १६३८३ हस्तिप्रमाणमषीपुंजैर्लेख्यानि स्थापना च । तस्मान्महापुरुषप्रणीतत्वेन

सर्वाणि संज्ञा	उत्पाद पूर्व १	अग्राय णीय २	वीर्यप्र वाद ३	अस्तिप्रवा द ४	ज्ञानप्रवा द ५	सत्यप्रवा द ६	आत्मप्र वाद ७	कर्मप्र वाद ८	प्रत्याख्या नप्र ९	विद्याप्र वाद १०	कल्या ण ११	प्राणावा य १२	क्रियावि शाल १३	लोकबिंदु सार १४
हस्तिमित मषीपुंज	१	२	४	८	१६	३२	६४	१२८	२५६	५१२	१०२४	२०४८	४०९६	८१९२

मान्यो गंगानीरावैरिव ॥ यतः ॥ मंत्रनदीनां जा० हृद्यवाल्लुकया सावादहीणां जंतवदयं तन्नो श्रेणं तपणीत आत्माइ-
क्रमस्तु नस्म ॥ २ ॥ सुखजिह्वासहस्रस्यात् हृदयाय केवलं यदि तथापि कल्पमाहात्म्यं वक्तुं शक्यं न मानवैः ॥
२ अथ तस्य श्रीकल्पस्य वाचनश्रवणाच अधिकारिणो मुख्यवृत्त्या साधुसाध्व्यस्तत्रापि कालातो रात्री वि-
हितकालग्रहणादिविधीनां साधूनां वाचनं श्रवणं च साध्वीनां च निशीथचूर्ण्युक्तविधिना दिवापि तथा श्री-
वीरनिर्वाणात् अशीत्यधिकनवशत ९८० वर्षातिक्रमणे मतांतरेण त्रिनवत्यधिकनवशत ९९३
वर्षातिक्रमे ध्रुवसेननृपस्य पुत्रमरणार्त्तस्य समाधिमाधातुं आनंदपुरे सभासमक्षं सभाद्यास्त्र श्रीक-
ल्पसूत्रं वाचयितुमारब्धं ततः प्रभृति चतुर्विधोपि संघः श्रवणाधिकारी वाचनं तु विहितयोगोद्वहन-
साधुरेव ॥ अथ अस्मिन् वार्षिकपर्वणि कल्पश्रवणवत् तस्मान्यपि पंच कार्याणि अवश्यं कार्याणि तद्यथा चि-
त्यपरिपाटी १ समस्तसाधुवंदनं २ सांवत्सरिकप्रतिक्रमणं ३ मिथः साधर्मिकक्षामणं ४ अष्टमं तपश्च ५ एषां चापि क-
ल्पश्रवणवद्भावितदायकत्वं अवश्यकर्त्तव्यत्वं जिनाज्ञा तत्वं च ज्ञेयं तत्र अष्टमं तप उपवासत्रयात्मकं महाफ-
लकारणं रत्नत्रयवदाराध्यं त्रयोन्मूलनं जन्मत्रयपावनं कायवाङ्मनसा दोषत्रयशोषकं विशिष्टत्रयाद्यपदा-
प्रापकं नि ॥ अथ यथा सपदा सिलाघ्राके स्वयं कर्त्तव्यं नागकेतुवत् तथाहि चंद्रकांतानगरी तत्र विजयसेनो ना- ८

म राजा ॥ श्रीकांताख्यश्च व्यवहारी तस्य श्रीसखी भार्या ॥ तया च बहुप्रार्थितः पुत्रः प्रसूतः स च बाल-
क आसन्नपर्युषणापर्वणि कुटुंबकृताष्टमवार्त्ताश्रवणात् जातजातिस्मृतिः स्तन्यपानेपि अष्टमं कृत-
वान् ततस्तस्तन्यपानमकुर्वाणः पुष्पितमालतीकुसुममिव म्लानं आलोक्य मातापितरौ अनेकानु-
पायांश्चक्रुः क्रमाच्च मूर्च्छाप्राप्तं बालं मृतं ज्ञात्वा स्वजनास्तं भूमौ निक्षिपति स्म ततश्च विजयसेनो राजा त-
त्पुत्रं तदपुत्रधनं तत्पितरं च मृतं विज्ञाय तद्धनग्रहणाय सुभटान् प्रेषयामास इतश्च अष्टमप्रभावात् प्र-
कंपितासनो धरणेंद्रः सकलं तत्स्वरूपं विज्ञाय ह्र मिषेण बालकं अमृतसिंचनया आश्वास्य विप्ररू-
पं कृत्वा धनं गृह्णतस्तान्निवारयामास ततश्च ज्ञा रा जापि त्वरितं तत्रागत्योवाच भो भूदेव परंप-
रागतं इदं अस्माकं अपुत्रधनग्रहणं कथं निवा र यसि धरणेनावादीत् राजन् जीवत्यस्य पुत्रः ॥ क-
थं कुत्रास्तीति राजादिभिरुक्ते भूमिस्थं जीवंतं बालकं साक्षात्कृत्य निधानमिव दर्शयामास ॥ ततः स-
र्वेपि सविस्मयाः स्वामिन् कस्त्वं कोयं इति पृष्टः सोवदत् अहं धरणेंद्रो नागराजः कृताष्टमतपसोस्य
महात्मनः साहाय्यार्थमागतोस्मि राजादिभिरुक्तं स्वामिन् जातमात्रेण अनेन अष्टमतपः कथं कृतं
धरणेंद्र उवाच राजन् अयं हि पूर्वभवे कस्यचिद्वणिजः पुत्रो बाल्येपि मृतमातृक आसीत् स च अप-
रमात्रा अत्यंतं पीड्यमानो मित्राय स्वदुःखं कथयामास सोपि च यथा पूर्वजन्मनि तपो न कृतं तेन त्वं प-

िरानवंलसमज्ञसुपदिष्टवान् । ततोसौ यथाशक्तितपोनिरतः आगामिन्यां पर्युषणायां अष्ट
मं करिष्यामीति मनसि निश्चित्य स्वगृहकुटीरं सुष्वाप । तदा लब्धावसरया विमात्रा आसन्नप्रदीपना
त् अग्निकणास्तत्र निक्षिप्तास्तेन स कुटीरकः ज्वलितः सोपि मृतः । अष्टमध्यानाच्चायं श्रीकांतगृहस्य
नंदनो जातः तस्य तातेन पूर्वभवचिंतितं अष्टमतपः सांप्रतं कृतं । तदासो महादुःखापालघुकर्मा ऽस्मि
न्नावश्यं क्षिप्रगामी यत्नात्पालनीयः सर्वथाप्ययं म हात उपकाराय भविष्यतीति उक्त्वा नागराजः स्व
हारं तत्कंठे निक्षिप्य स्वस्थानं जगाम । ततः स्वज नि श्रीकांतस्य मृतकार्यं विधाय तस्य नागकेतुरि
तिनाम कृतं । क्रमाच्च स बाल्यादपि जितेंद्रि य : प रमश्रावको बभूव एकदा च विजयसेन

राजेन कश्चित् अचौरोपि चौरकलंकेन हतः । तो व्यंतरो जातः स समग्रनगरविघाताय शिलां र
चितवान् राजानं च पादप्रहारेण रुधिरं वमंतं सिं हासनाद्भूमौ पातयामास तदा स नागकेतुः कथं
इमं संघं प्रासादं विध्वंसं जीवन् पश्यामीति श्रीप्रासादशिखरं आरुह्य शिलां पाणिना दधे ततः स व्यं
तरोपि तत्तपःशक्तिं असहमानः शिलां संहृत्य नागकेतुं नतवान् तं च नृपं अपि निरुपद्रवं कृ
तवान् । अन्यदा स नागकेतुः जिनेंद्रपूजां कुर्वन् पुष्पमध्यस्थितसर्पेण दष्टोपि तथाविधभावनया आरू
ढः केवलज्ञानं आसादितवान् ततः शासनदेवतार्पितमुनिवेषः स विहरतिस्म । एवं नागकेतु

×णा+

वत् अष्टमाश्चया अन्यैरपि अष्टमतपसि यतनीयं । इति नागकेतुकथा ८ । अथात्र श्रीकल्पसूत्रे त्रीणि
वाच्यानि । यथा । पुरिमचरिमाणकप्पो मंगलं वद्धमाणतित्थंमि । इहपरिकहिआ जिणगणहराइ थेराव
लीचरित्तं । व्याख्या । पुरिमचरिमाणत्ति ऋषभवीरजिनयोः कप्पत्ति अयं कल्पः आचारः यत वृष्टिर्भ
वतु मा वा परं अवश्यं पर्युषणा कर्तव्या उपलक्षणत्वात् कल्पसूत्रं वाचनीयं च । मंगलमिति एकं अयं
आचारः अपरं च मं गलं मंगलकारणं सर्व ति वर्द्धमानतीर्थे कस्मा दवंडत्वाद् यस्मादि
हं परिकथितानि ॥ जि णत्ति जिनानां चरि ता नि १ गणहराइ थे रावलित्ति गणध

त णं का लेणं ॥ ते णं समए णं ॥ ॥८॥

रादिस्थविरावली ॥ २ चरित्तमि त्ति सामाचारी तत्र प्र थमाधिकारजिन
चरितेषु आसन्नोपका रितया प्रथमं श्रीवीरच रितं वर्ण्यते श्रीभद्रबा हुस्वामिना जघन्यम
ध्यमवाचनात्मकं प्रथमं सूत्रं रचयंति । तेणं कालेणमित्यादि परिनिव्वुडे भयवमिति पर्यंतं । तेणं का
लेणंति वि त्ति कालविभागः समये न स्मिन्नसमये समणे भगवंमहावीरत्ति
श्रमणस्तापानि र तः भगवतिभग वा न् अर्कीयानि व र्जितवादशालग
शाहार्थवान् ॥ त था ऊःसगा के १ ज्ञान १ मा हा त्म्य वयशा ६ ॥

+ तस्मिन्काले अवसर्पिणी चतुर्थारकपर्यंतलक्षणे णकारः सर्वत्र वाक्यालंकारार्थः तेणं समएणंति + ३३ ~

× यः श्रीवर्द्धमानस्वामिनः च्यवनादिवस्तूनां कारणं बभूव ×

विरागणपरत्वक्तिशुद्धरूपवीर्यप्रत्याख्यानप्राणआवश्री११धार्म१२अयरिक्रयानि१४ १ अत्र आद्यांत्यो अ
धिविर्जनीयो। न तु आत्यार्थस्तु वर्ज्यं एवं परं अकी कथं वर्ज्यः सत्यं उपमानतया आकृष्टिवत्तिपरं वस्तु
यात् तावन्न अकीर्वानइत्यार्थानलगतीतिवर्जितः। महावीरत्रिकर्माविरिपगालवसमर्थः श्रीवर्द्धमानस्वा
मीत्यर्थः। स पंचहस्तोत्तराहोऽभवत् हस्तात् उत्तरा उत्तरफाल्गुन्यः गणनया तास्मात् हस्त उत्तर यास् ता
पंचसुस्थानेषु यस्य स पंचहस्तोत्तरा लग्नावान् होऽभवत् ॥ अथ षट्कल्याण
कवादी प्राहन तु पं चहस्तोत्तरस्सा इ णापरिनिर्वुड इ तिवचनान महा
समणस्स भग वं म हावी र ॥ पंचह त्थु त्त र होत्था
वीरस्य षट्कल्या ण कंथं संपन्नमवा मि वं एवं अभ्यमान पं च उत्तरासाढ अ
भीइ बाठाहोऽभवत् जं बूद्वीपप्रज्ञप्तिवचनात् श्रीऋषभस्यापि षट्क ल्याणकानि वक्तव्या
नि स्युः न च तानि व्याख्यातानि आचार्यैः तस्माद् यथा पंच उत्तराषाढ इत्यत्र नक्षत्र सामान्यात् राज्याभिषे
कामाश्रणितःपरं। कल्याणकानि उ अ भीइ अहिइ इत्यानन सह पंचैव तथात्रापि पंच
हस्तोत्तरा इत्यत्र नक्ष त्र सामान्यात् गर्भा प हारा मध्ये गणि त ः परं कल्याणका
नि तु साइणाप रि णि व्वुडे। इ त्य ननसह पं चि व॥ ५५॥ २०

तथा श्रीआचारांगटीकाप्रभृतिषु पंचहस्तोत्तर इत्यत्र पंचवस्तून्येव व्याख्यातानि न तु कल्याणकानि
किंच श्रीहरिभद्रसूरिकृतयात्रापंचाशकस्य अभयदेवसूरिकृतायां टीकायां अपि आषाढशुद्धष
ष्ठ्यां गर्भसंक्रमः चैत्रशुद्धत्रयोदश्यां जन्म मार्गसितदशम्यां व्रतं वैशाखशुद्धदशम्यां केवलं
४ कार्त्तिकामावास्यायां मोक्षः ५ एवं श्रीवीरस्य पंच कल्याणकानि उक्तानि अथ यदि षष्ठस्यात् तदा त
स्यापि दिनं उक्तं स्यात् अन्यच्च नीचैर्गोत्रविपाकरूपस्य अतिनिंद्यस्य आश्चर्यरूपस्य गर्भापहार
स्यापि कल्याणकत्वकथनं अनुचितं अथ पंच ह स्तुत्तर इत्यत्र गर्भापहरणं कथं उक्तं इति चेत्
॥ तं जहा हत्थुत्तराहिं चुए चइत्ता गब्भं व क्कं त ॥ हत्थुत्तराहिं गब्भाओ गब्भं साहरिए हत्थु
त्तराहिं जाए ॥ त्य अत्र हि सगवाद् देवानंदा कु क्षौ अवतीर्णः प्रसूतवती च त्रिशाला इति असं
गतिः स्यात् तन्निवारणाय पंचहस्तोत्तरत्रिवचनं इत्य लं प्रसंगेन कल्याणकानि पंचैव तजद्दनि तथा
पंचहस्तोत्तर भगवतां मध्यमवाचनया दर्शयति हत्थुत्तराहिं चुए त्ति उत्तरफाल्गुनीषु च्युतो देव
लोकात् चइत्ता गब्भं वक्कंते त्ति स्तुवा गर्भे उत्पन्नः हत्थुत्तराहिं गब्भाओ गब्भं साहरिए त्ति उत्तरफा
ल्गुनीषु गर्भात् गर्भं संहृतः देवानंदागर्भात् त्रिशलागर्भे संक्रान्त इत्यर्थः हत्थुत्तराहिं जाए त्ति उत्तरफा
ल्गुनीषु जातः ॥ ७॥ ॥७॥

Dr. BHAU DAJI MEMORIAL
डाक्टर भाऊ दाजी इत्याख्यस्य स्मारकम्

हत्थुत्तराहिं मुंडे भवित्ता अगाराओ अणगारियं पव्वइए त्ति उत्तरफाल्गुनीषु मुंडो भूत्वा तत्र द्रव्यतो मुंडः केशलुंचनेन भावतो मुंडो रागद्वेषाभावेन अगारात् गृहात् निष्क्रम्येति शेषः अनगारितां साधुतां पव्वइए त्ति प्रतिपन्नः तथा उत्तरफाल्गुनीषु अणंते त्ति अनंतं अनंतवस्तुविषयं अणुत्तरे त्ति अनुपमं निव्वाघाए त्ति निर्व्याघातं भित्तिकटादिभिरस्खलितं निरावरणे त्ति समस्तावरणरहितं कसिणे त्ति कृत्स्नं सर्वपर्यायोपेतसर्ववस्तुज्ञापकं पडिपुन्ने त्ति परिपूर्णं सर्वावयवसंपन्नं एवं

हत्थुत्तराहिं मुंडे भवित्ता अगाराओ अणगारियं पव्वइए हत्थुत्तराहिं अणंते अणुत्तरे निव्वाघाए निरावरणे कसिणे पडिपुन्ने केवलवरनाणदंसणे समुप्पन्ने साइणा परिनिव्वुए भयवं तेणं कालेणं तेणं समएणं समणे भगवं महावीरे विधं यत्र वरं प्रधानं केवलज्ञानं केवलदर्शनं च तत् उत्तराफाल्गुनीषु प्राप्तः साइणा परिनिव्वुए भयवं ति स्वातिनक्षत्रे मोक्षं गतो भगवान् ॥ अथ विस्तरवाचनया श्रीवीरचरित्रं तेणं कालेणं तेणं समएणं समणे भगवं महावीरे त्ति प्राग्वत् जे से गिम्हाणं ति यः स ग्रीष्मकालस्य चउत्थमासे त्ति चतुर्थमासः अट्ठमे पक्खे त्ति अष्टमः पक्षः कोर्थः आसाढसुद्धे आषाढशुक्लपक्षः तस्स णं आसाढसुद्धस्स त्ति तस्य आषाढशुक्लपक्षस्य छट्ठीपक्खेणं ति षष्ठीरात्रौ महाविजयपुप्फुत्तरपवरपुंडरीआओ महाविमाणाओ त्ति ॥ ११

महाविजयाय यत्तत् महाविजयं पुप्फुत्तरं ति उत्तराभिधानामकं पवरपुंडरीयं ति प्रवरं श्रेष्ठं अन्यश्रेष्ठविमानेषु पुंडरीकमिव श्वेतकमलमिव अतिश्रेष्ठं इत्यर्थः तस्मात् महाविमाणाओ त्ति महाविमानात् किंविशिष्टात् विंशतिसागरोपमस्थितिकात् तत्र हि देवानां विंशतिसागराणि उत्कृष्टा स्थितिर्भवति भगवतोपि तावत्प्रमाणस्थितिरासीत् अथ तस्माद्विमानात् आउक्खएणं ति देवायुःक्ष

जे से गिम्हाणं चउत्थे मासे अट्ठमे पक्खे आसाढसुद्धे तस्स णं आसाढसुद्धस्स छट्ठीपक्खेणं महाविजयपुप्फुत्तरपवरपुंडरीआओ महाविमाणाओ वीससागरोवमट्ठिइआओ आउक्खएणं भवक्खएणं ठिइक्खएणं अणंतरं चयं चइत्ता इहेव जंबुद्दीवे दीवे भारहे वासे दाहिणड्ढभरहे इमीसे ओसप्पिणीए सुसमसुसमाए समाए ॥५॥

येण भवक्खएणं ति देवगतिनामकर्मक्षयेण ठिइक्खएणं ति स्थितिर्वैक्रियशरीरेऽवस्थानं तस्याः क्षयेण प्रक्षीकरणेन अणंतरं ति अंतररहितं चयं चइत्ता त्ति च्यवनं कृत्वा इहेव जंबुद्दीवे दीवे त्ति अस्मिन्नेव जंबूद्वीपनाम्नि द्वीपे भारहे वासे त्ति भरतक्षेत्रे दाहिणड्ढभरहे त्ति दक्षिणार्द्धे भरते इमीसे ओसप्पिणीए त्ति यत्र समये रूपरसादीनां हानिः स्यात् सा अवसर्पिणी तस्याः अवसर्पिण्यां सुसमसुसमाए त्ति सुषमसुषमानाम्नि समायां ॥

वइक्कंताए त्ति चतुःकोटाकोटिसागरप्रमाणप्रथमारके अतिक्रांते सुसमाए त्ति सुषमानाम्नि त्रिकोटा
कोटिसागरप्रमाणे द्वितीयारके अतिक्रांते सुसमदूसमाए त्ति सुषमदुःषमानाम्नि द्विकोटाको
टिसागरप्रमाणे तृतीये अतीते दूसमसुसमाए त्ति दुःषमसुषमानाम्नि चतुर्थारके बहुवइक्कं
ताए त्ति बहुव्यतिक्रांते किंचिद् ऊन सागरोपमकोडाकोडीए त्ति द्विचत्वारिंशत् ४२
वर्षसहस्राः ४२००० न्यूनैकसागरकोटाकोटि सुचतुर्थारकप्रमाणे तत्रापि चतुर्थारकस्य पं

वइक्कंताए सुसमाए समाए वइक्कंताए ॥ सु समदुस्समाए समाए वइक्कंताए दुस्समसु
समाए समाए बहु वइक्कंताए सागरो व म कोडाकोडीए बायालीसाए वाससह
स्सेहिं ऊणियाए पंचह त्तरीए वासेहिं अ द्धनवमेहि अ मासेहिं सेसेहिं इक्कवीसाए तित्थय
रेहिं इक्खागकुलसमुप्पन्नेहिं दोहि अ
व स प्ततिउपवर्षसार्द्धाष्टमासशेषेषु श्रीवीरा
वतारः द्वासप्ततिवर्षाणि च श्रीवीरस्यायुः श्रीवीरनिर्वाणात् त्रिषु वर्षेषु सार्द्धाष्टमासेषु च चतुर्था
रकसमाप्तिः ततः पूर्वोक्ता या द्विचत्वारिंशद्वर्षसहस्री सा एकविंशतिएकविंशतिवर्षसहस्रप्रमाणायाः पं
चमारकषष्ठारकायाः संबंधिनी ज्ञेया एक्कवीसाए तित्थयरेहिं इति एकविंशतितीर्थंकरेषु इक्खागत्ति इ
क्ष्वाककुलसमुत्पन्नेषु कासवगुत्तेहिं ति काश्यपगोत्रेषु दोहि अत्ति द्वयोः मुनिसुव्रतनेम्योः

हरिवंशकुलसमुत्पन्नयोर्गौतमगोत्रयोः एवं तेवीसाए त्ति त्रयोविंशतितीर्थंकरेषु अतीतेषु समणे
त्ति श्रमणो भगवान् महावीरः किंविशिष्टः चरमतीर्थंकरः पुनः किंविशिष्टः पूर्वतीर्थंकरनिर्दिष्टः श्रीवीरो भ
विष्यतीत्येवं पूर्वजिनैः कथितः माहणेत्यादि ब्राह्मणकुंडग्रामनाम्नि नगरे उसभदत्तस्सत्ति ऋषभद
त्तस्य ब्राह्मणस्य किंविशिष्टस्य कोडालसमानं गोत्रं यस्य स तथा तस्य कोडालगोत्रस्येत्यर्थः भारियाए त्ति तस्य

हरिवंसकुलसमुप्पन्नेहिं गोअमसगुत्तेहिं ते वीसाए तित्थयरेहिं वइक्कंतेहिं समणे भगवं महा
वीरे चरमतित्थयरे पुव्वतित्थयरनिद्दिट्ठे मा ह णकुंडग्गामे नयरे उसभदत्तस्स माहण
स्स कोडालसगुत्तस्स भारियाए देवाणंदाए ए मा हणीए जालंधरसगुत्ताए पुव्वरत्तावरत्तका
लसमयंसि हत्थुत्तराहिं नक्खत्तेणं जोगमुवाग ए णं आहारवक्कंतीए भववक्कंतीए सरीरवक्क
ंतीए कुच्छिंसि गब्भत्ताए वक्कंते ॥ समणे भगवं महावीरे तिन्नाणोवगए आवि होत्था ॥

सा यीयाः देवानंदा ब्राह्मण्याः जालंधरसगोत्रायाः कुक्षौ गर्भतया वक्कंते त्ति व्युत्क्रांत उत्पन्न इति संबंधः
कदा पुव्वरत्तावरत्त त्ति पूर्वरात्रापररात्रकालसमये मध्यरात्र इत्यर्थः हत्थुत्तराहिं ति उत्तराफल्गुनीनक्षत्रे
जोगमुवागएणं ति चंद्रयोगं प्राप्ते सति कया आहारवक्कंतीए त्ति आहारापक्रांत्यादिव्याहारत्यागेन भ
ववक्कंतीए त्ति दिव्यभवत्यागेन सरीरवक्कंतीए त्ति दिव्यशरीरत्यागेन अथ यदा भगवान् गर्भे उत्पन्न

१२

स्तदा तिन्नाणोवगए आवि होत्था ज्ञानत्रयोपगत आसीत् ततः चयिष्य इति जानाति च्यवनस्य विषयका
लं जानातीत्यर्थः च्यवमानो न जानाति एकसामयिकत्वात् चुतोऽस्मीति च जानाति तथा जं रयणिं च
णं ति यस्यां रजन्यां श्रमणो भगवान् महावीरो देवानंदाया ब्राह्मण्याः कुक्षौ गर्भतया उत्पन्नः तं रयणिं च
णं ति तस्यां रजन्यां सा देवानंदा सुत्तजागरत्ति नातिनिद्रायंती नातिजाग्रती ओहीरमाणी २ त्ति अल्पा

चइस्सामि त्ति जाणइ चयमाणे न याणइ चुएमि त्ति जाणइ जं रयणिं च णं समणे भगवं महावीरे
देवाणंदाए माहणीए जालंधरसगुत्ताए कुच्छिंसि गब्भत्ताए वक्कंते तं रयणिं च णं सा देवाणं-
दा माहणी सयणिज्जंसि सुत्तजागरा ओहीरमाणी २ इमेयारूवे उराले कल्लाणे सिवे
धन्ने मंगल्ले सस्सिरीए चउद्दस महासुमिणे पासित्ताणं पडिबुद्धा तं जहा गय वसह सीह अ-
भिसेअ दाम ससि दिणयरं झयं कुंभं पउमसर सागर॥ ॥ निद्रां कुर्वती ऽइमत्ति इमा-
न् एतद्रूपान् वक्ष्यमाणस्वरूपान् उरालत्ति उदारान् प्रशस्तान् कल्लाणत्ति कल्याणकारकान्
सिवत्ति शिवान् उपद्रवहरान् धन्नत्ति धन्यान् धनावहान् मंगल्लत्ति मंगलकारकान् सस्सिरीयत्ति सश्री-
कान् ईदृशान् चतुर्दश महास्वप्नान् पासित्ता पडिबुद्धत्ति दृष्ट्वा जागरिता तं जहत्ति तद्यथा गयवसह
त्ति गाथा सुबोधा नवरं अभिषेकः श्रियाः संबंधी पउमसरत्ति पद्माः पद्मोपलक्षितं सरः॥ ॥ ७ ॥ १३

विमाणत्ति भवणत्ति विमानं देवसंबंधि भवनं गृहं तत्र यः स्वर्गादवतरति तन्माता विमानं पश्यति यस्तु
नरकादायाति तन्माता भवनमिति द्वयोरेकतरदर्शनात् चतुर्दशैव स्वप्नाः सिहिं चत्ति शिखीनिर्धूमाग्नि
तएणं ति ततः सा देवानंदा यथोक्तान् स्वप्नान् दृष्ट्वा पडिबुद्धा समाणीत्ति जागरिता सती हट्ठत्ति हृष्टा
मा विस्मयं प्राप्ता तुट्ठत्ति संतोषं प्राप्ता चित्तमाणंदियत्ति [illegible] चित्तेन आनंदिता पीइमणत्ति प्री

विमाण १२ भवण १२ रयणुच्चय १३ सिहिं च १४ तए णं सा देवाणंदा माहणी इमेयारूवे उराले कल्ला
णे सिवे धन्ने मंगल्ले सस्सिरीए चउद्दस महासुमिणे पासित्ताणं पडिबुद्धा समाणी हट्ठतुट्ठचि-
त्तमाणंदिया पीइमणा परमसोमणस्सिया हरिसवसविसप्पमाणहियया धाराहयकयंब
पुप्फगंपिव समुस्ससिअरोमकूवा सुमिणुग्गहं करेइ सुमिणुग्गहं करित्ता सयणिज्जाओ अब्भु-
ट्ठेइ अब्भुट्ठित्ता अतुरिअं ति तुष्टचित्ता परमसोमणस्सिआ परमं सौमनस्यं संतुष्टचित्तत्वं
जातं यस्याः सा तथा हरिसवसविसप्पमाणत्ति हर्षवशेन विसर्प्पमाणत्ति विस्तारवत् हिअयत्ति हृदयं यस्याः सा तथा पु-
नः किंभूता धाराहयकयंबपुप्फगंपिवत्ति धारया मेघजलधारया आहतं सिक्तं एवंविधं यत् कदंबतरु-
कुसुमं तद्वत् मेघधारया कदंबतिततत्तद्वत् समुस्ससिअत्ति समुच्छ्वसितानि उच्छ्वसितानि रोमाणि कूपेषु य-
स्याः सा तथा एवंविधा सती स्वप्नानां अवग्रहं स्मरणं करोति तत्कृत्वा च सयणिज्जाओ त्ति शय्याया अब्भुट्ठित्ति उत्तिष्ठ-
ति अतुरिअं अचवलमिति॥ ॥

अत्वरितया मानसौत्सुक्यरहितया अचवलत्ति अचपलया कायचापल्यवर्जितया असंभंतात्ति अ
संभ्रांतया अस्खलंत्या अविलंबियाए त्ति विलंबरहितया राजहंससदृशया गत्या जेणेवत्ति यत्रैव
ऋषभदत्तो ब्राह्मणस्तत्रैवोपागच्छति उपागत्य ऋषभदत्तं ब्राह्मणं जयेन विजयेन वर्द्धापयति आ
शिषं ददाति तत्र जयः स्वदेशे विजयः परदेशे वर्द्धापयित्वा च भद्रासनवरगता ततः अतुरिय
मचवलमसंभंताए अविलंबियाए रायहंससरिसीए गईए जेणेव उसभदत्ते माहणे तेणेव उ
वागच्छइ उवागच्छित्ता उसभदत्तं माहणं जए णं विजएणं वद्धावेइ वद्धावित्ता भद्दासणवरग
या आसत्था वीसत्था सुहासणवरगया करयलपरिग्गहियं दसनहं सिरसावत्तं मत्थ
ए अंजलिं कट्टु एवं वयासी ७ एवं खलु अहं देवाणुप्पिया अज्ज सयणिज्जंसि सुत्तजाग
रा ओहीरमाणी ओहीरमाणी इमेयारूवे उराले जाव सस्सिरीए चउद्दस महासुमिणे पासित्ताणं पडिबुद्धा
तं जहा गय जाव सिहिं च ॥ ७ ॥ त्ति आश्वस्ता श्रमापनयनेन वीसत्थत्ति विश्वस्ता संक्षोभाभावेन अत एव
सुहासणवरगयत्ति सुखेन आसनवरं प्राप्ता करयलपरिग्गहियमित्यादि करतलाभ्यां परिगृहीतं कृतं ×रि×
दशनखाः संमिलिता यत्र तं शिरसावर्त्तं शिरसि आवर्त्तः प्रदक्षिणात्मको यस्य तं तथाविधं अंजलिं म २४
स्तके कृत्वा देवानंदा एवं वयासीत्ति एवं अवादीत् किं तदित्याह ७ एवं खल्वित्यादि सिहिं यावदिति याव
×तं× त्याद्युक्त ७

एएसिं णमिति एतेषां देवानुप्रिय चतुर्दशानां महास्वप्नानां किं मन्ने त्ति मन्ये विचारयामि कः कल्या
णकारी फलवृत्तिविशेषो भविष्यति तत्र फलं पुत्रादि वृत्तिर्जीवनोपायादि तत्राणीति ततः स ऋषभद
त्तो ब्राह्मणो देवानंदाया अंतिके पार्श्वे एतमर्थं श्रुत्वा कर्णाभ्यां निशम्य चेतसा अवधार्य हृष्ट इत्यादि प्रा
ग्वत् सुमिणुग्गहंति स्वप्नावग्रहं करोति तत्र कृत्वा ईहां अर्थविचारणां प्रविशति तां कृत्वा च अप्पणोत्ति
एएसिं णं देवाणुप्पिया उरालाणं जाव चउदसण्हं महासुमिणाणं किं मन्ने कल्लाणे फलवित्तिविसे
से भविस्सइ तए णं से उसभदत्ते माहणे देवाणंदाए माहणीए अंतिए एयमट्ठं सुच्चा निसम्म
हट्ठतुट्ठ जाव हियए धाराहयकयंबपुप्फगंपिव समुस्ससिअरोमकूवे सुमिणुग्ग
हं करेइ करित्ता ईहं अणुपविसइ ईहं अणुपविसित्ता अप्पणो साहाविएणं मइपुव्वए
णं बुद्धिविन्नाणेणं तेसिं सुमिणाणं अत्थुग्गहं करेइ अत्थुग्गहं करित्ता देवाणंदं माहणिं एवं व
×उमे× यासी उराला णं देवाणुप्पिए सुमिणा दिट्ठा कल्लाणा सिवा धन्ना मंगल्ला सस्सिरीया ॥
आत्मनः स्वाभाविकेन मतिपूर्वकेन बुद्धिविज्ञानेन तत्र अनागतकालविषया मतिः वर्त्तमानकालविषया च
बुद्धिः विज्ञानं चातीतानागतवस्तुविषयं तेषां स्वप्नानां अत्थुग्गहंति अर्थनिश्चयं करोति तं कृत्वा देवानंदा
ब्राह्मणीं एवं अवादीत् किं तदित्याह उरालाणमित्यादि उदाराः त्वया देवानुप्रिये स्वप्ना दृष्टा कल्लाणेत्यादि प्रा
ग्वत्

आरुग्गत्ति आरोग्यं नीरोगत्वं तुट्ठित्ति तुष्टिः संतोषः दीहाउत्ति दीर्घायुः चिरजीवित्वं कल्लाणत्ति कल्याणं
उपद्रवाभावः मंगल्लत्ति मंगलं वांछितावाप्तिः एतेषां वस्तूनां कारकाः त्वया स्वप्ना दृष्टाः तं जहत्ति तद्यथा
अत्थलाभो देवाणुप्पिए इत्यादीनि सुगमानि एवं खलु तुमं देवाणुप्पिए नवण्हं मासाणंति नवसु मासेषु
बहुप्रतिपूर्णेषु अद्धट्ठमाणत्ति सार्द्धसप्त अहोरात्राधिकेषु अतीतेषु एतादृशं दारकं पुत्रं प्रयास्यहि
सित्ति प्रजनिष्यसीति संबंधः किं विशिष्टं दारकं॥ सुकुमालेत्यादि सुकुमालपाणिपादं यावत्

आरुग्गतुट्ठिदीहाउकल्लाणमंगल्लकार +गा+ णं तुमे देवाणुप्पिए सुमिणा दिट्ठा तं जहा अ
त्थलाभो देवाणुप्पिए भोगलाभो देवाणु प्पि ए पुत्तलाभो देवाणुप्पिए सुक्खलाभो देवा
णुप्पिए एवं खलु तुमं देवाणुप्पिए नवण्हं मा साणं बहुपडिपुन्नाणं अद्धट्ठमाणरा
इंदियाणं वइक्कंताणं सुकुमालपाणिपायं॥ अहीणपडिपुन्नपंचिंदियसरीरं लक्खण॥

विधं पुनः किं विशिष्टं अहीणत्ति अहीनानि लक्षणतः पूर्णानि पडिपुन्नत्ति स्वरूपेण प्रतिपूर्णानि पंचेंद्रिया
णि यत्र तादृशं शरीरं यस्य स तथा तं तथा लक्खणवंजणगुणोववेयं ति तत्र लक्षणानि चक्रि
तीर्थकृतां अष्टोत्तरसहस्रं बलदेववासुदेवानां अष्टोत्तरशतं अन्येषां भाग्यवतां द्वात्रिंशत् तानि च
मानि छत्र १ तामरस २ धनु ३ रथवर ४ दंभोलि ५ कूर्म ६ अंकुशा ७ वापी ८ स्वस्तिक ९ तोरणानि १० च सरः ११

× व ×

+छत्रचामरादीनि+३

१५

पंचाननः १२ पादपः १३ चक्र १४ शंख १५ गजौ १६ समुद्र १७ कलशौ १८ प्रासाद १९ मत्स्याः २० यवाः २१ यूप
२२ स्तूप २३ कमंडलू २४ न्यवनिभृत् २५ सच्चामरा २६ दर्पणः २७ उक्षा २८ पताका २९ कमलाभिषेक
३० सुदाम ३१ केकी ३२ घनपुण्यभाजां तथाऽड्दसवति सप्तरक्तः षडुन्नतः पंचसूक्ष्मदीर्घः त्रिविपुल
लघुगंभीरो द्वात्रिंशल्लक्षणः स पुमान् १ तत्र सप्त रक्तानि नख १ चरण २ हस्त ३ जिह्वा ४ ओष्ठ ५ तालु ६ ने
त्रांताः ७ षडुन्नतानि कक्षा १ हृदयं २ ग्रीवा ३ नासा ४ नखाः ५ मुखं ६ च पंचसूक्ष्माणि दंताः १ त्व
क् २ केशाः ३ अंगुलिपर्वाणि ४ नखाः ५ पंच दीर्घाणि नयन १ हृदयं २ नासिका ३ हनु

४ भुजौ ५ च त्रीणि विस्तीर्णानि भालं १ उरः २ व दनं ३ च त्रीणि लघूनि ग्रीवा १ जंघा २ मेहनं च ३
त्रीणि गंभीराणि सत्त्वं १ स्वरः २ नाभिश्च ३ मुखमर्द्धं शरीरस्य सर्वं वा मुखमुच्यते ततोपि
नासिका श्रेष्ठा नासिकायाश्च लोचने १ यथा नेत्रं तथा शीलं यथा नासा तथार्जवं यथा रूपं तथा
वित्तं यथा शीलं तथा गुणाः २ अतिह्रस्वेऽतिदीर्घेऽति स्थूले चातिकृशे तथा अतिकृष्णेऽतिगौरे च
षट्सु सत्त्वं निगद्यते ३ सद्धर्मः सुभगो नीरुक् सुस्वप्नः सुनयः कविः सूचयत्यात्मनः श्रीमान् न
रः स्वर्गगमागमौ ४ निर्दंभः सदयो दानी दांतो दक्षः सदा ऋजुः मर्त्यायातः समुद्भूतो भविता च
पुनस्तथा ५ मायालोभक्षुधालस्य बह्वाहारादिचेष्टितैः तिर्यग्योनिसमुत्पत्तिं ख्यापयत्यात्मनः॥

पुमान् ६ मरालः स्वजनद्वेषी । उत्तरेषां सुखं संगच्छत । शास्तिस्वस्थगतायातं । नारी नरक । वर्त्मनि ७
आवर्त्तो दक्षिणो भागे । दक्षिणः शुभकृन्नृणां । वामो वाममिति निंद्यः स्याद्दिग्न्यस्तु मध्यमः ८ अरेखं
यवाकाररेखा । येषां पाणितलस्थिता । तस्युः सल्पाङ्गुष्ठानि ; स्वा । दुःखिता नाम सशयः ९ अनामिकांत्यरे
खायाः । कनिष्ठा स्याद्यदाधिका । धनवृद्धिस्तदा पुंसां । मातृपक्षो बहुस्तथा १० मणिबंधात्पितुर्ले
खा । करभाद्विभवायुषोः । लेखाद्वयं याति ति॥ स्थापि तर्जन्यंगुष्ठकांतरं ११ येषां रेखा इमास्ति
स्राः संपूर्णा दोषवर्जिताः । तेषां गोत्रधनायु [चि] संपूर्णान्यन्यथा न तु १२ उल्लंघ्यंते च यावत्या

वंजणगुणो [व] [वे] यं । माणुम्माण

युल्यो जीवितोरेखया । पंचविंशतयोऽब्दया । [स्ता] वत्यः शरदां बुधैः १३ यदि स्यांगुष्ठमध्यस्थै
र्विद्याख्यातिविभूतयः । शुक्लपक्षे तथा जन्मदः । [क्षि] क्षिणांगुष्ठगे स्थिते १४ नश्रीस्त्यजति रक्ताक्षं
नार्थः कनकपिंगलं । दीर्घबाहुं नवैश्वर्यं । नमांसोपचितं सुखं १५ वक्षः स्याद्धनिनो सांगं । दंतैस्त
द्धनालाजनं । वक्षः स्याद्धनिनोख्यस्यात्याद्धस्याद्धनवादनं १६ उरा विशाला धनधान्यभोगी । शिरोवि
शालो हपपुंगवस्य । कटीविशाला बहुपुत्रदारा । विशालपादः सततं सुखी स्यात् १७ इमानि लक्ष
णानि व्यंजनानि च मषतिलकादीनि तेषां गुणास्तैरुपपेतं । पुनः किंवि० माणुम्माणेत्यादि ॥

+न्य+

२६

×यज्ञा लं। निम्नरत्नि×२ +व+२

तत्र मानं जलस्तत्कुंडांतः पुरुषनिवेशिते यदि तज्जलं द्रोणमानं स्रवेत्तदा स पुरुषो मानप्राप्तः । य
दि वा तुलारोपितः अर्द्धभारमानः स्यात्तदा स उन्मानप्राप्तः । तत्र भारमानं षट्सर्षपैर्यस्त्रिकागुंजिका
च यो वल्लस्ति; गुंजात्रयेण वल्लः स्यात् षोडश्याः गणितवाषोडशः १ पलचत्वशगद्याणा स्तेषां सार्द्धशतेम
णः मणादशाभिस्काव धटिका कथिता बुधैः ; २ धटी निर्देशभिस्तालि । गाकाभारः प्रकीर्त्तितः । अत्रैते
षां सार्द्धशतं मणा इति तेषां गद्याणानां इति वाच्यं [चु] पलानां । पलानां सार्द्धशतेन मणः कथितो दश भार
अष्टसप्ततिर्मणाः स्युस्तदा द्विपलाकानि चत्वारि [श] न्मणास्तावच्छरीरमानं न संभवति । गद्याण
नां सार्द्धशतेन॥ पमाणपडिपुन्नसु [जा] [य] सव्वंगसुंदरंगं ॥ मणाकथानुत्तारे चत्वा
रिंशतास्मरमानाः पादानाष्टमणाः किंचिदधि [का] जायंते संभवति तदर्द्धमानं पंचाशराधिकपादो
नवधर्माणप्रमाणशरीरमिति । संभवति च गद्याण [?] कानां सार्द्धशतस्यापि मणावेक्षविंशाकिं चिहून
सरत्रयस्यापि मणाऽव्यवहारात् । तथापमाणानि स्वांगुलेनाष्टोत्तरशतांगुलोच्च उत्तमपुरुषः । मध्यम
हीनपुरुषो च पश्मवति । ९६ चतुरशीत्यंगुलोच्चो स्यातां । अत्र उत्तमपुरुषापि । अन्य एव तीर्थंकरस्तु
द्वादशांगुलाधिकैश्व भावत । विंशत्यधिकशतांगुलोच्चा भवंति तत उन्मानमानप्रमाणैः प्रतिपूर्णा
नि सुजातानि सर्वांगानि शिरःप्रभृतीनि यत्रैवंविधं सुंदरं अंगं यस्य स तथा तं ॥ ॥

* अस्तु रयमाता नेपद्दीति अयं प्रयोगो विचार्यः ॥ मैव आत्मनेपदमनित्यमिति न्यायात् कश्चिद्

पुनः किंभूतं ससिसोमागारं त्ति शशिवत् सौम्याकारं कंतं त्ति कमनीयं पियदंसणं ति वल्लभद
र्शनं सुरूवं त्ति शोभनरूपं दारकं पुत्रं जनिष्यसीति ज्ञेयं ॥ ८ ॥ ९ ॥ सेवि य णं दारए स च दारकः णं वाक्या
लंकारे सोपि दारक एवंविधो भविष्यति किंभूत उम्मुक्कबालभावे त्ति उन्मुक्तबाल्यो जाताष्टवर्षः पुनः
किंभूतः विन्नायपरिणयमित्ते त्ति विज्ञानपरिणतमात्रं यस्य स तथा क्रमाच्च किंभूतः जोव्वणगमणुप्प
त्ते त्ति यौवनं अनुप्राप्तः पुनः किंभूतः रिउव्वेय ॥ दि ऋग्वेद यजुर्वेद सामवेद अथर्ववेदा ।

ससिसोमागारं कंतं पियदंसणं सुरूवं दा र यं पयाहिसि ॥ ९ ॥ सेवि य णं दारए उम्मु
क्कबालभावे विन्नायपरिणयमित्ते । जो व्व णगमणुप्पत्ते रिउव्वेय जउव्वेय सा
मवेय अथव्वणवेय इतिहासपंचमाणं नि घंटुछट्ठाणं संगोवंगाणं सरहस्साणं चउ
ण्हं वेयाणं सारए [illegible] दानां कीदृशानां इति हासः पंचमो येषां ते तथा ते
षां पुनः कीदृशानां निघंटुछट्ठाणं ति निघंटु नाम संग्रहः षष्ठो येषां ते तथा तेषां पुनः कीदृशानां संगोवं
गाणं ति अंगोपांगसहितानां तत्र अंगानि शिक्षा १ कल्प २ व्याकरण ३ छंदो ४ ज्योतिष ५ निरुक्ताः ६ उप
पांगानि अंगार्थविस्तररूपाणि पुनः कीदृशानां सरहस्साणं ति तात्पर्ययुक्तानां चउण्हं ति ईदृशा
नां चतुर्णां वेदानां सारए त्ति स्मारकः अन्येषां विस्मरणे ॥ ॥

ते। यतः। स्वाधीने विवसते व्यत्येन रय ति भवति किं मानिन इति प्रयोगात् इ तिधातुपारायणे = २०

*- अत्र षष्ठी बहुवचनलोपात् ×

२३

वारए त्ति वारकः अन्येषां अशुद्धपाठनिषेधात् धारए त्ति धारणासमर्थः ईदृशो दारको भावी पुनः किंभू
तः सडंगवी त्ति षडंगानि प्रागुक्तानि विचारयतीति षडंगवित् ज्ञानार्थात् अपि न स्यात् पुनः किंभूतः
सट्ठितंतविसारए षष्टितंत्रं कापिलीयशास्त्रं तत्र विशारदः पंडितः पुनः किंभूतः संखाणे त्ति गणितशा
स्त्रे यथा अर्हताय कईमिह द्वादशाशाः षष्टिसागरवालुकायां निमग्नाः सार्धद्वादशवर्षा तस्य तस्य
स्तेन तस्याः बुद्धिमान् विचिंत्य १ स्वालादस्याः दक्क वित् सिक्खाणे त्ति पावस्तत्र सिक्खाणे शास्त्रे न आचा
रग्रंथः सिक्खाकप्पे त्ति शिक्षा अक्षराम्नायग्रंथः क कल्पश्च यज्ञादिविधिशास्त्रं तत्र तथा वागरणे त्ति

वारए धारए सडंगवी सट्ठितंतविसार य संखाणे सिक्खाकप्पे वागरणे छंदे नि
[illegible] छंदनिरुत्ते जोइसाम य णे अन्नेसु अ बहूसु बंभण्णएसु परिव्वायएसु नएसु ×बहूसु×

व्याकरणे शब्दशास्त्रे तानि च विंशतिः ऐंद्र १ जैनेंद्र २ सिद्धहेम ३ चांद्र ४ पाणिनि ५ सारस्वत ६
शाकटायन ७ वामन ८ विश्रांत ९ बुद्धिसागर १० सरस्वतीकंठाभरण ११ विद्याधर १२ कलाप १३ भीमसे
न १४ शैव १५ गौड १६ नंदि १७ जयोत्पल १८ मुष्टिव्याकरण १९ जयदेव २० सिद्धनामानि छंदे त्ति छंदःशास्त्रे
निरुत्ते त्ति पदसंजनपदव्युत्पत्तिरूपटीकादौ इत्यर्थः जोइसामयणे त्ति ज्योतिःशास्त्रे अन्नेसु य त्ति प्र
भृतावोक्तेषु अन्येषु च बहुषु बंभण्णएसु त्ति ब्राह्मणहितेषु शास्त्रेषु परिव्वायएसु त्ति परिव्राजकसंबं

×य×

उदारास्त्वया स्वप्ना दृष्टा इति कट्टु त्ति इति कृत्वा भुज्जो २ अणुबूहइ त्ति स्तूयात्स्तूयावा २ अनुबृंहयति
अनुमोदयति ११ तएणमित्यादि तावयामित्तियाव सुगमं १२ ततः सा देवानंदा एवं अवादीत् किमित्याह

सुपरिनिट्ठिए आविलविस्समइ १३ तं उरालाणं तुमे देवाणुप्पिए सुमिणा दिट्ठा जाव आरुग्ग तुट्ठि
दीहाउ मंगल्लकारगाणं तुमे देवाणुप्पिए सुमिणा दिट्ठ त्ति कट्टु भुज्जो २ अणुबूहइ १४
तए णं सा देवाणंदा माहणी उसभदत्तस्स माहणस्स अंतिए एयमट्ठं सुच्चा निसम्म हट्ठतुट्ठ
जाव [illegible] हियया करयलपरिग्गहियं दसनहं सिरसावत्तं मत्थए अंजलिं कट्टु एवं
वयासी १५ एवमेयं देवाणुप्पिया तहमेयं देवाणुप्पिया अवितहमेयं देवाणुप्पिया
असंदिद्धमेयं देवाणुप्पिया इच्छियमेयं देवाणुप्पिया पडिच्छियमेयं देवाणुप्पिया
इच्छियपडिच्छियमेयं देवाणुप्पिया सच्चे णं एसमट्ठे से जहेयं तुब्भे वयह त्ति ॥

एवमेयमित्या[illegible]दि एवमेतत् ... तहमेयं ति तथैतत् यथावस्थितं सत्यं अवितहमेयं ति यथा
स्थितं एतत् असंदिद्धमेयं ति संदेहवर्जितं एतत् इच्छियमेयं ति ईप्सितं एतत् पडिच्छियमेयं ति प्र
तीष्टं अभ्युपगमात् एतदेव गृहीतं इच्छियपडिच्छियं ति उभयधर्मोपेतं सच्चे णं एसमट्ठे त्ति सत्यमेषोर्थः
जहेयं ति यथैवैतद्यूयं वदथ

२८

सो त्ति अथ
ति ... यत्तत्र

कट्टु त्ति इति कृत्वा इति ... ऋषभदत्तब्राह्मणेन सार्द्धं उदारान् मानुष्यकान् भोगभोगाइं ति भो
गार्हान् भोगान् भोगाः भोगास्तान् भोगभोगान् भुंजाना विहरति १३ ॥ तेणं कालेणमित्यादि तस्मिन् का
ले तस्मिन् समये शक्रो विहरतीति संबंधः किंविशिष्टः सक्के त्ति शक्रनामसिंहासनाधिष्ठाता देवि
दे त्ति देवानां इंद्रः देवराय त्ति देवेषु राजा कांत्यादिगुणैः राजमानः वज्रपाणि त्ति करधृतवज्रः ॥
पुरंदर त्ति दैत्यनगरविदारकः सयक्कउ त्ति ॥ शतं क्रतवः श्राद्धपंचमप्रतिमारूपा यस्य स शतक्र

कट्टु ते सुमिणे सम्मं पडिच्छइ सम्मं पडिच्छित्ता उसभदत्तेणं माहणेणं सद्धिं उरालाइं मा
णुस्सगाइं भोगभोगाइं भुंजमाणी विहरइ ॥१३॥ तेणं कालेणं तेणं समएणं सक्के
देविंदे देवराया वज्जपाणी पुरंदरे सयक्कऊ ॥

तुः ॥ इदं हि कार्त्तिकश्रेष्ठिभवापेक्षया
तथाहि पृथ्वीभूषणनगरे प्रजापालो नाम राजा कार्त्तिकनामा श्रेष्ठी तेन श्राद्धप्रतिमानां श
तं कृतं ततः शतक्रतुरिति ख्यातिः एकदा च गैरिकपरिव्राजको मासोपवासी तत्रागतः एकं का
र्त्तिकं विना सर्वोऽपि लोकस्तद्भक्तो जातः स ज्ञात्वा कार्त्तिकोपरि गैरिको रुष्टः एकदा च राज्ञा निम
न्त्रितः स वदति यदि कार्त्तिकः परिवेषयति तदा तव गृहे पारणं करोमि राज्ञा तथेति प्रतिपद्य कार्त्ति
कायोक्तं यत्त्वं [illegible] इह गैरिकं भोजय ततः कार्त्तिकेनोक्तं राजन् त्वदाज्ञया भोजयिष्यामि

ततः। श्रेष्ठिना लोक्यमानो गैरिको हृष्ट आसीत् इति श्रु[illegible]नासिकां स्पृशन् स्थितवांश्चारः। अथ श्रेष्ठी दध्यौ य
दि मया पूर्वं दीक्षा गृहीता स्यात् तदायं न पराभविष्यदिति विचिंत्य अष्टाधिकसहस्रवणिक्पुत्रैः
सह चारित्रं गृहीत्वा द्वादशांगीं अधीत्य द्वादशवर्षपर्यायः सौधर्मेंद्रो भूत्। गैरिकोपि निजधर्मतस्त
स्य वाहनं ऐरावणोऽभवत्। ततः कार्तिकोयमिति ज्ञात्वा पलायमानेन तेन द्वौ शक्रः। शीर्षद्वयारूढः। सद्वशक्र
स्यापनार्थं रूपद्वयं कृतवान् शक्रोपि तथाप्यं रूप[illegible]चतुष्टयं शक्रोपि तथा ततः अवधिना ज्ञातस्वरूपस्तं
तर्जितवान्। तर्जितश्च स्वाभाविकरूपवान्॥ इति कार्तिकश्रेष्ठिकथा। सहस्राक्ष इति
सहस्सक्खे मघवं पागसासणे दाहिणड्ढलोगाहिवई एरावणवाहणे सुरिंदे ब
त्तीसविमाणसयसहस्साहिवई अरयंबरवत्थधरे आलइयमालमउडे। मंत्रिदेवपंचश
तालोचनानि इंद्रकार्यकरणीति इंद्रसंबंधीन्येवेति सहस्राक्षः। मघवंति मघा महामेघा वशे संत्य
स्य मघवान्। पागसासणं त्ति पाकाभिधं दैत्यं शास्ति शिक्षयतीति पाकशासनः। दाहिणड्ढलोगाहिवइ त्ति मे
रोर्दक्षिणतो यल्लोकार्धं तस्याधिपतिः। उत्तरलोकार्धस्य ईशानस्वामिकत्वात्। एरावणवाहणे त्ति ऐ
रावणवाहन। सुरिंदे त्ति सुराणां इंद्र आह्लादकः। बत्तीसविमाणसयसहस्साहिवइ त्ति द्वात्रिंशल्लक्षवि
मानाधिपतिः। अरयंबरवत्थधरे अरजांसि निर्मलानि अंबरवस्त्राणि अंबरतुल्यानि वस्त्राणि १८

वस्त्राणि तानि धरतीति अरजांबरवस्त्रधरः। आलइयमालमउडे त्ति आलगितो यथास्थानं परिहितो मा
लायुक्तो मुकुटो यस्य स तथा। नवहेमेत्यादि। नवमिव नवं यद्धेम तस्य संबंधिनौ चारुणी मनोज्ञौ चित्र
त्रि[illegible]चित्रकारिणौ चंचलत्वेन कंपमानौ ईदृशौ यौ कुंडलौ ताभ्यां विलिहिज्जमाण
त्ति विलिख्यमानौ गंडौ यस्य स तथा। महिड्ढीए त्ति महती ऋद्धिः छत्रादिराजचिह्नरूपा यस्य स तथा। महज्जुइ
त्ति महती द्युतिः आभरणशरीरादिकांतिर्यस्य स तथा। महब्बले त्ति महाबलः। महायसे त्ति महायशा
नवहेमचारुचित्तचंचलकुंडलविलिहिज्जमाणगल्ले महिड्ढीए महज्जुइए महब्बले महा
यसे महाणुभावे महासुक्खे भासुरबोंदी पलंबवणमालधरे सोहम्मे कप्पे सोह
म्मवडिंसए विमाणे सुहम्माए सभाए सक्कंसि सीहासणंसि। से णं तत्थ बत्तीसाए विमाणावास
। महाणुभावे त्ति महान् अचिंत्यः प्रभावो महिमा यस्य स तथा। महासुक्खे त्ति महा सयसाहस्सीणं
सुखः। पुनः किंविधः भासुरबोंदी भासुरं दीप्यमानं बोंदिः शरीरं यस्य स तथा। पुनः किंविधः प
लंबवणमालधरे प्रलंबा आपादतलविलंबिनी वनमाला पंचवर्णपुष्पमाला यस्य स तथा। अथ सूत्रवर्त्ति
लेऽन्योह। सोहम्मे कप्पे त्ति सौधर्मकल्पे। सोहम्मवडिंसए विमाणे त्ति सौधर्मावतंसकविमाने सु
हम्माए सभाए त्ति सुधर्मायां सभायां सक्कंसि सीहासणंसि त्ति शक्राभिधाने सिंहासने। अथ स किं कु
र्वन् विहरति इत्याह। से णं तत्थ बत्तीसाए इत्यादि। सेइत्ति स शक्रः तत्र देवलोके। द्वात्रिंशद्विमानावासश

त्री ते सामानिकसहस्राणां ते इंद्रसमानऋद्धयः तायत्रीसा पूज्याः त्रयस्त्रिंशत् त्रायस्त्रिंशका
नां ते हि महत्तरा इह ज्ञेयाः चतुर्णां लोकपालानां सोमयमवरुणकुबेराख्यदिगधिपानां अ
ष्टानां अग्रमहिषीणां ताश्च पद्मा१शिवा२शची३अंजू४अमला५अप्सरा६नवमिका७रोहिणी८
त्यभिधानाः किंविशिष्टानां तासां सपरिवाराणां तथा तिसृणां पर्षदां बाह्या१मध्यमा२भ्यंतराणां३
सत्तण्हं अणिआणं तिसप्तानां अनीकानां सैन्यानां गंधर्व१नाटक२अश्व३गज४रथ५पदाति६वृषभ७

चउरासीए सामाणियसाहस्सीणं तायत्तीसाए तायत्तीसगाणं चउण्हं लोगपालाणं अट्ठ
ण्हं अग्गमहिसीणं सपरिवाराणं तिण्हं परिसाणं सत्तण्हं अणीआणं सत्तण्हं अणिआ
हिवईणं चउण्हं चउरासीणं आयरक्खदेवसाहस्सीणं अन्नेसिं च बहूणं सोहम्मक
प्पवासीणं वेमाणिआणं देवाणं देवीण य आहेवच्चं

हरिणेगमेसिसंज्ञकानां सेनापत्यादीनां इत्युपलक्षणमन्येषामपि ज्ञेयं तथा सत्तण्हं अणिआहिवईणं
तिसप्तानां सेनापतीनां चउण्हं चउरासीणंति चतसृणां दिशां प्रत्येकं चतुरशीतिसहस्रमितानामा
त्मरक्षकदेवानां सर्वसंख्यया षट्त्रिंशत्सहस्राधिकलक्षत्रयमितानां ३३६००० अन्नेसिं च बहूणं
सौधर्मकल्पवासिनां विमानिकानां देवानां देवीनां च आहेवच्चंति अधिपतिकर्म रक्षा इत्यर्थः ब २०

पोरेवच्चंति अग्रगामित्वं सामित्तंति नायकत्वं भट्टित्तंति पोषकत्वं महत्तरगत्तंति गुरुतरत्वं आ
णाईसरसेणावच्चंति आज्ञया ईश्वरः सेनापतिस्तस्य भावः स्वसैन्यं प्रति अद्भुतं आज्ञाप्राधान्यं इत्यर्थः कारे
माणेत्ति कारयन् नियुक्तैः पालेमाणेत्ति पालयन् स्वयमेव पुनः किं कुर्वन् महयेत्यादि तत्र महता र
वेण इत्यनेनास्य योगः महता शब्देनेत्यर्थः केषां इत्याह अहयत्ति अविच्छिन्नं एवंविधं यत् नट्टेति नाट्यं

पोरेवच्चं सामित्तं भट्टित्तं आणाईसरसेणावच्चं कारेमाणे पालेमाणे महयाहयनट्टगीयवाइअतं
तीतलतालतुडियघणमुइंगपडुपडहवाइयरवेणं दिव्वाइं भोगभोगाइं भुंजमाणे विहर
इ १४ इमं च णं केवलकप्पं जंबुद्दीवं दीवं विउलेणं ओहिणा आभोएमाणे २ विहरइ तत्थ
णं समणं भगवं महावीरं जंबुद्दीवे दीवे भारहे वासे दाहिणड्ढभरहे माहणकुंडग्गामे नयरे
उसभदत्तस्स माहणस्स कोडालसगुत्तस्स भारियाए देवाणंदाए माहणीए जालं

गीतं प्रसिद्धं वाइ
यंति वादितानि यानि तंत्र्यादीनि तेषां तत्र तंत्री वीणा तलताला हस्ततालाः तुडिअत्ति त्रुटितानि अन्यवादित्रा
णि घणमुइंगत्ति घनमृदंगा मेघध्वनिमर्दला तथा पडुपडहवाइयत्ति पटुपटहस्य प्रवादितस्य वादन
रवेण महता शब्देन दिव्यान् भोगार्हान् भोगान् भुंजानो विहरति पुनः स किं कुर्वन्नित्याह इमं च णंति इमं
केवलकप्पंति संपूर्णं जंबूद्वीपद्वीपं विपुलेन विस्तीर्णेन ओहिणत्ति अवधिना आभोएमाणे २त्ति अवलोकयन् २

Dr. BHAU DAJI
MEMORIAL

विरुत्ति आस्तड इति संबंधः तत्र णमित्यादि सुगमं यावत् धाराहयत्ति धाराहतं यत् कदंबस्य सुरभिकु-
सुमं तद्वत् चंचुमालइयत्ति रोमांचितः। ऊसविय रोमकूवे उच्छ्रितरोमकूपः तथा वियसिय-
वरकमलाणणनयणत्ति विकसितवरं पद्मनयकमलं तद्वत् आननं मुखं नयने च यस्य स तथा हर्षाद
प्रचलितत्वात् पयलियवरकडगतुडियकेऊरमउडकुंडलत्ति तत्र प्रचलितानि सगर्वहेशनेन अधि-
धरसगुत्ताए कुच्छिंसि गब्भत्ताए वक्कंतं पासइ पासि त्ता हट्ठतुट्ठचित्तमाणंदिए पी-
इमणे परमसोमणस्सिए हरिसवसविसप्पमाण हि यए धाराहयकयंबसुरहिकुसुमचंचुमाल-
इयऊससियरोमकूवे वियसियवरक म ला णणनयणे पयलियवरकडगतुडिय-
केऊरमउडकुंडलहारविरायंतवच्छे पाल ले बमाणघोलंतभूसणधरे ससंभमं तुरियं चव-
लं सुरिंदे सीहासणाउ ॥ कसंत्वमवच्छ्रात् वरक(कैवित्तोनि)डगत्ति वराणि कटकानि कंकणानि त्रुटिताश्च बा-
हुरक्षकाः केयूराणि अंगदानि बाहुबंध इति लोके मउडत्ति मुकुटं कुंडले च
प्रसिद्धे एतानि प्रचलितानि यस्य स तथा। पुनः किंविशिष्टः हारविरायंतवच्छेत्ति हारेण विराजमानं वक्ष-
हृदयं यस्य ... स तथा तृतीया विशेषणसमासः पुनः किं पालंबपलंबमाणघोलंतभूसणधरे पा-
लंबपलंबमाणत्ति प्रलंबमानं ... प्रालंबो झुंबनकं घोलंतभूसणत्ति दोलायमानानि भूषणानि तानि धरतीति य-
ः स तथा ससंभ्रमं सादरं तुरियंति सोत्सुकं चवलंति कायचापल्योपेतं एवंविधः सन् सिंहासनादभ्युत्तिष्ठति

अभ्युत्तिष्ठति यावत् पादपीठात् प्रत्यवतीर्य पादुके अवमुंचति किंविशिष्टे वेरुलिअत्ति वैडूर्यं मरक-
तेनाम नीलरत्नं वरिट्ठरिट्ठअंजणत्ति वरिष्टप्रधानं रिष्टं अंजननामा श्रीरत्न एतै रत्नैः कृतानि
उणोवियत्ति निपुणेन शिल्पिना रचिते इव पुनः किंविशिष्टे मिसिमिसिंतत्ति दीप्यमानानि मणिरय-
णत्ति मणयश्चंद्रकांतादयः रत्नानि कर्केतनादीनि तैर्मंडिते ईदृशे पादुके अवमुच्य एगसाडिअं
अब्भुट्ठइ अब्भुट्ठित्ता पायपीढाउ पच्चोरुहइ २त्ता वेरुलियवरिट्ठरिट्ठअंजणनिउणोवियमि-
सिमिसिंतमणिरयणमंडियाउ पाउयाउ ओ मु यइ ओमुइत्ता एगसाडियं उत्तरासंगं करेइ
करित्ता अंजलिमउलियग्गहत्थे तित्थ य रा भिमुहे सत्तट्ठपयाइं अणुगच्छित्ता वामं ×अणुगच्छइ ×२
जाणुं अंचइ अंचित्ता दाहिणं जाणुं धरणित लं सि साहट्टु तिक्खुत्तो मुद्धाणं धरणितलंसि
निवेसइ निवेसित्ता ईसिं पच्चुण्णमइ ॥ त्ति एक पटं उत्तरासंगं करोति तत्कृत्वा अंजलिमउलिय-
ग्गहत्थेत्ति अंजलिकरणेन मुकुलीकृतौ योजितौ अग्रहस्तौ येन स तथा भूतः सप्ताष्टपदानीति
किंकरा निस्तुरवाः गच्छति तत्कृत्वा वामं जानुं अंचेइत्ति उत्पाटयति ऊर्ध्वं स्थापयति दक्षि-
णं जानुं धरणीतले साहट्टु निवेश्य तिक्खुत्तोत्ति वारत्रयं मुद्धाणंति मस्तकं धरणीतले निवेश-
यति तथा कृत्वा ईसिं पच्चुण्णमइत्ति ईषत् प्रत्युन्नमति उत्तमाङ्गेन आसन्नवर्तीत्यर्थः ॥

तथाच्छ्याकटकत्रुटिकाः कंकणा बाहुरक्षकास्ताभिः स्तंभितौ भुजौ यस्य सः हस्तौ निवालयति वालयित्वा क
रतलपरिगृहीतं दसनखं संपुटघटितं दशानखाः समुदिता यत्र स तथा तं सिरसावत्तंति शिरसि मस्तके आवर्त्त
:प्रदक्षिणाभ्रमणं यस्य एवंविधं मस्तकेंजलिं कृत्वा एवमवादीत् किं तदित्याह नमुत्थु णंति णमो
णो वाक्यालंकारार्थः नमोस्त्वित्यन्वयः अरहंताणंति अर्हद्भ्यः त्रिभुवनकृतायाः पूजायाः योग्येभ्यः कर्मवि
रिहननात् अरिहंताणं इति पाठः कर्मबीजाना वेन सर्वथा भवांकुरारोहणाभावात् अरुहंताणं इति।
एहुत्तमित्ताकडगतुडिअथंभियाउ भुआ उ साहरइ साहरित्ता करयलपरिग्गहिअं द
सनहं सिरसावत्तं मत्थए अंजलिं कट्टु एवं व या सी नमुत्थु णं अरिहंताणं भगवंताणं
आइगराणं तित्थयराणं सयंसंबुद्धाणं पुरि सु त्तमाणं पुरिससीहाणं पुरिसवरपुंडरीआ णं
पावहु भगवंताणंति भगवद्भ्यो ज्ञानादिवद्भ्यः॥ आदिकरेभ्यः स्वस्वतीर्थापेक्षया धर्मस्येति ज्ञेयं
तीर्थंकरेभ्यः तत्र तीर्थं संघः प्रथमगणधरो वा तत्स्थापकेभ्यः सयंसंबुद्धाणंति स्वयंसंबुद्धेभ्यः अन्यान
उपदेशेन पुरिसुत्तमाणंति पुरुषाणां मध्ये उत्तमेभ्यः अनंतगुणनिधानत्वात् पुरुषसिंहेभ्यः कर्मवि
रिपुनिर्दलनशूरत्वात् पुरिसवरपुंडरियाणंति पुरुषवरपुंडरीकेभ्यः पुरुषप्रवरपद्मेभ्यः
पुंडरीकं श्वेतपद्मं तद्वत् येभ्यः यथा पुंडरीकं पंके जातं जलेन वृद्धं जलपंकौ त्यक्त्वा उपरि तिष्ठति
एवं भगवंतोपि कर्मकर्दमे उत्पन्ना भोगजलेन वृद्धाः कर्मभोगौ त्यक्त्वा उपरि तिष्ठंति

पुरिसवरगंधहत्थीणंति पुरुषवरगंधहस्तिभ्यः यथा गंधहस्तिगंधेन अन्यगजाः पलायंते तथा भ
गवत्प्रभावेण दुर्भिक्षादयोपि नश्यंति लोगुत्तमाणंति लोकस्य भव्यसमूहस्य चतुस्त्रिंशदतिशययु
क्तत्वात् उत्तमा लोकोत्तमास्तेभ्यो लोकोत्तमेभ्यः लोगनाहाणंति लोकानां भव्यानां नाथेभ्यः योग
क्षेमकारिभ्यः तत्र योगः अप्राप्तज्ञानादिप्रापणं क्षेमं च प्राप्तज्ञानादिरक्षणं लोगहिआणंति।
लोकानां सर्वजीवानां हितेभ्यो हितकारके भ्यो दयाप्ररूपकत्वात् लोगपईवाणंति लोक
पुरिसवरगंधहत्थीणं लोगुत्तमाणं॥ लो ग नाहाणं लोगहिआणं लोगपईवाणं लो
गपज्जोअगराणं अभयदयाणं चक्खु द याणं
प्रदीपेभ्यः मिथ्यात्वध्वांतनाशकत्वात्
लोकप्रद्योतकराणंति लोकप्रद्योतकरेभ्यः सूर्यवत्सर्ववस्तुप्रकाशकत्वात् अभयदयाणंति
भयानां अभावो अभयं तद्दायकेभ्यः भयानि सप्त तद्यथा मनुष्यस्य मनुष्याद्भयं इहलोकभयं
१ मनुष्यस्य देवादेर्भयं परलोकभयं २ धनादिग्रहणाद्भयं आदानभयं ३ बाह्यनिमित्तनिर
पेक्षं भयं अकस्माद्भयं ४ आजीविकाभयं ५ मरणभयं ६ अपयशोभयं ७ इति चक्खुदयाणं

२२

ति वस्तु समानश्रुतज्ञानदायकत्वात् मग्गदयाणंति मार्गस्य सम्यग्दर्शनादिमोक्षमार्गस्य दायके-
भ्यः यथा कश्चिज्जनो अटव्यां चौरैर्लुंटितधनो लोचनपट्टबंधं कृत्वा उन्मार्गपातितस्तस्य स चाक्षिपट्टा- + पा + २
कापनयनेन धनार्पणेन मार्गदर्शनेन उपकारी भवति एवं भगवंतोपि कषायैर्लुंटितधर्मधना-
नां मिथ्यात्वाच्छादितविवेकनयनानां श्रुतज्ञानसद्धर्मसिद्धिमार्गदानेन उपकारिणो भव-
ति सरणदयाणंति भवभीतानां शरणदा य कत्वात् जीवदयाणंति जीवनं जीवः सर्वथा

मग्गदयाणं सरणदयाणं जीवदया णं धम्मदयाणं धम्मदेसयाणं धम्मनाय-
गाणं धम्मसारहीणं ॥

